श्री ऋणविमोचन महागणपति स्तोत्रं

श्री ऋणविमोचन महागणपति स्तोत्रं

स्मरामि देवदेवेशं वक्रतुंडं महाबलं |
षडक्षरं कृपासिंधुं नमामि ऋणमुक्तये ||1||

एकाक्षरं ह्येकदंतं एकं ब्रह्म सनातनं |
एकमेवाद्वितीयं च नमामि ऋणमुक्तये ||2||

महागणपतिं देवं महासत्त्वं महाबलं |
महाविघ्नहरं शंभोः नमामि ऋणमुक्तये ||3||

कृष्णांबरं कृष्णवर्णं कृष्णगंधानुलेपनं |
कृष्णसर्पोपवीतं च नमामि ऋणमुक्तये ||4||

रक्तांबरं रक्तवर्णं रक्तगंधानुलेपनं |
रक्तपुष्पप्रियं देवं नमामि ऋणमुक्तये ||5||

पीतांबरं पीतवर्णं पीतगंधानुलेपनं |
पीतपुष्पप्रियं देवं नमामि ऋणमुक्तये ||6||

धूम्रांबरं धूम्रवर्णं धूम्रगंधानुलेपनं |
होमधूमप्रियं देवं नमामि ऋणमुक्तये ||7||

फालनेत्रं फालचंद्रं पाशांकुशधरं विभुं |
चामरालंकृतं देवं नमामि ऋणमुक्तये ||8||

इदं त्वृणहरं स्तोत्रं संध्यायां यः पठेन्नरः |
षण्मासाभ्यंतरेणैव ऋणमुक्तो भविष्यति ||9||

इति ऋणविमोचन महागणपति स्तोत्रं |